## आतो ङितः । (८१/२२३८)

आकारस्य ङिदवयबस्य आकारान्तादङ्गादुत्तरस्य [1]सार्वधातुकस्य इय् इत्ययमादेशो भवति । पचेते । पचेथे । पचेताम् । पचेथाम् । यजेते । यजेथे । यजेताम् । यजेथाम् ।

'सार्वधातुकमपित्' (१.२.४/२२३४) इत्यत्र न ङितीव ङिद्वत् इत्येवमङ्गीक्रियते, अपि तु ङित इव ङिद्वत् इति । पूर्वसूत्र [2]एव उच्चुकुटिषति इति [3]प्रसिद्धये तथाङ्गीकरणम् । [4]यदि गाङकुटादिसूत्रे (१. २. १/२४६१) ङित इव ङिद्वद् भवति इत्येवमङ्गीक्रियते, तदा 'अनुदात्तङित आत्मनेपदम्' (१. ३. १२/२१५७) इत्यात्मनेपदं प्राप्नोति इति । आतः इति किम् ? [5]पचन्ति । यजन्ति । पचन्ते । यजन्ते । ङितः इति किम् ? [6]पचावहै । पचामहै । अतः इत्येव, चिन्वाते । सुन्वाते । तपरकरणम् किम् ? मिमाते । मिमाथे[7] ॥

## आने मुक् । (८२/३१०१)

[8]आने परतोऽङ्गस्यातः मुगागमो भवति । पचमानः । यजमानः । अकारमात्रभक्तोऽयं मुक् अदुपदेशग्रहणेन गृह्यते इति अदुपदेशादिति लसार्वधातुकानुदात्तत्वं भवति । यद्येवम् 'आतो ङितः' (७.२.८१/२२३५) इत्ययमपि विधिः प्राप्नोति ? तपरनिर्देशान्न भविष्यति । मुकि सति अध्यर्धमात्रो भवति । लसार्वधातुकानुदात्तत्वमपि तर्हि न प्राप्नोति ? [9]नैष दोषः । उपदेशग्रहणं तत्र क्रियते । तेन उपदेशादूर्ध्वं सत्यपि कालभेदे भवितव्यम् । तथा च पचावः, पचामः इत्यत्रापि भवति ॥

## ईदासः । (८३/३१०४)

आसः उत्तरस्य आनशब्दस्य ईकारादेशो भवति । आसीनो [10]यजते । [11]अत्र पञ्चम्याः [12]परस्य षष्ठी [13]कल्प्यते ॥

## अष्टन आ विभक्तौ । (८४/३७१)

[14]अष्टनो विभक्तौ परतः आकारादेशो भवति । अष्टाभिः । अष्टाभ्यः । अष्टानाम् । अष्टासु । विभक्तौ इति किम् ? अष्टत्वम् । अष्टता । आ इति व्यक्तिनिर्देशोऽयम् । आकृतिनिर्देशे तु [15]नकारस्थानेऽ[16]-नुनासिकाकारः स्यात् । विकल्पेनायमाकारो[17]भवति, एतज्ज्ञापितम् 'अष्टनो दीर्घात्' (६.१.१७२/३७१८) इति दीर्घग्रहणात्, 'अष्टाभ्य औश्' (७.१.२१/३७२) इति च कृतात्वस्य [18]निर्देशात् । तेन अष्टभिः, अष्टभ्यः इत्यपि भवति । तदन्तविधिश्चात्रेष्यते । प्रियाः अष्टौ [19]येषाम् ते प्रियाष्टानः । प्रियाष्टौ ॥

---

1. सार्वधातुकस्य नास्ति ब.क.इ. 2. तु ह. 3. सिद्धये क. 4. यदि–प्राप्नोति इति नास्ति क. इ. 5. नास्ति क. 6. यजावहै यजामहै क, नास्ति फ. 7. मिमते इत्यधिकम् ब. 8. आत इत्यनुवर्तते इत्यधिकम् क. 9. नैतदस्ति क. 10. जयते क. 11. वाक्यमिदं नास्ति ब.क.ड. 12. उत्तरस्य ब. 13. प्रकल्पते ब. 14. अष्टन् इत्येतस्य क.इ. 15. नकारस्य स्थाने क, नकारस्य ह. 16. अनुनासिकादेशः क, अनुनासिकः इ, सानुनासिकः ह. 17. कथं इत्यधिकम् क. 18. निर्देशाच्च क. 19. यस्याः सा प्रियाष्टाः ड.